# आचार्यपरमेश्वरनारायणशास्त्रिवर्याणाम् अभिनन्दनसमितिः

दिनाङ्कः ...30/05/2020...

श्रीमन्तः

**समादरणीयाः परिसरीयसदस्याः**

केन्द्रीयसंस्कृतविश्वविद्यालयः,

सदाशिवपरिसरः, पुरी

विषयः – आचार्यपरमेश्वरनारायणशास्त्रिमहाभागानां सम्मानस्य हेतोः अभिनन्दनग्रन्थविषयकसंस्मरणात्मकलेखनार्थं शोधपत्रलेखनार्थं च सादरं निवेदनम् ।

सम्मान्याः,

सादरम् अभिवन्दनम् ।

सविनयमिदमावेद्यते यत् सुरभारतीसमुपासकानां नैकशास्त्रविदुषां मृदुभाषिणां विविधभाषाभाषिणां सत्पुरुषाणां छात्रहितकाङ्क्षिणां शिष्यसमुद्धारकाणां सरलव्यक्तित्वशालिनां तत्रभवताम् आचार्यपरमेश्वरनारायण-शास्त्रिणाम् अनुष्ठितसेवायाः समर्चनाय सम्मानाय च अभिनन्दनग्रन्थप्रकाशनपूर्वकः समुद्यमः सत्प्रयासश्च करणीय इति नः चिन्तनम् । उद्यमस्यास्य साफल्यं भवत्सदृशानां विदुषां सहयोगं विना कथमपि न सम्भवति इत्यपि नः दृढविश्वासः ।

अस्माभिः सर्वैरपि स्फुटं विज्ञायते यत् श्रीमद्भिः शास्त्रिभिः राष्ट्रियसंस्कृतसंस्थानस्य साम्प्रतञ्च केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतेः पदग्रहणात् प्राक् नैकानि शैक्षिकदायित्वानि प्राशासनिकपदानि च निर्बाधतया प्रभावतया च स्वसेवाबलेन सार्थकीकृतानि विद्यन्ते । अमीषां कृतस्य प्रयासस्य फलत्वेन संस्थानमिदं केन्द्रीयविश्वविद्यालयत्वेन प्रोन्नतिमासाद्य अभूतपूर्वं वैशिष्ट्यमावहति ।

गुरुपरम्परायाः निर्वाहकाः अमी आचार्याः संस्कृतच्छात्राणां हिताय कल्याणाय च सततं यतमानाः वर्तन्ते इति सुविदितमेव विदुषाम् । कुलपतित्वेन संस्कृतच्छात्राणां कृते नियतवृत्तिप्राप्तये श्रीमद्भिः कृताः प्रयासाः प्राप्तं साफल्यं च अत्र प्रमाणम् । एतादृशानां महतां सम्मानाय एषः अत्यन्तम् लघुप्रयासः एव, यश्च प्रयासः भवतां महत्सहयोगम् अभिलषति । तत्रभवतां संस्मरणात्मकलेखेन स्वशास्त्राधारितशोधपत्रेण च ग्रन्थस्यास्य शोभा कीर्तिश्च वर्धिष्यते । तत्रभवन्तः अवश्यम् उपकरिष्यन्ति इत्यहं भृशं विश्वसिमि ।

अतः तत्रभवन्तः समादरणीयाः सम्माननीयाश्च विद्वांसः सादरं सम्प्रार्थ्यन्ते यत् कृपया स्वविचारान् स्वशब्दकुसुमैः गुम्फित्वा वै-पत्रम् (pnsfelicitation@gmail.com) प्रति जूनमासस्य त्रिंशत् दिनाङ्कं (30.06.2020) यावत् प्रयच्छन्तु इति ।

भवदीया

प्रभादेवी

प्रो. प्रभादेवी चौधरी
संयोजिका, अभिनन्दनसमितिः
(पूर्वविभागाध्यक्षा, शिक्षाशास्त्रम्
केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालम्)

DIRECTOR
CENTRAL SANSKRIT UNIVERSITY
SHREE SADASHIVA CAMPUS, PURI (ODISHA)